स्वर्गापवर्गमार्गं प्रथमं सकलानां कारणं देवं । निःशेषदुरितदलनं परम गुरुं नमत जिननाथम् ॥ १ ॥ रघुतिलकः प्रतिहार आसीत् श्रीलक्ष्मण इति रामस्य । तेन प्रतिहारवंशः समुन्नतिमत्र संप्राप्तः ॥ २ ॥ विप्रः श्रीहरिचन्द्रः भार्या आसीत् इतिक्षत्रिया भद्रा । अस्य सुत उत्पन्नः वीरः श्रीरज्जिलोत्र ३ ॥ अस्यापि नरभटनामा जातः श्रीनागभट इति एतस्य । अस्यापि तनयस्तातः तस्यापि यशोवर्द्धनो जातः ॥ ४ ॥ अस्यापि चंदुकनामा उत्पन्नः सिल्लुकोपि एतस्य ॥ झोट इति तस्य तनयः अस्यापि श्रीभिल्लुको जातः ॥ ५ ॥ श्रीभिल्लु-कस्य तनयः श्री कक्कः गुरुगुणैः गर्वितः। अस्यापि कक्कुक नामा दुर्लभदेव्या

मुत्पन्नः ॥ ६ ॥ ईषद्विकाशं हसितं मधुरं भणितं प्रलोकितं सौम्यं । नमनं यस्य न दीनं रासः स्थेयः स्थिरा मैत्री ॥ ७ ॥ नो जल्पितं न हसितं न कृतं न प्रलोकितं न संभृतम् । नास्थितं न परिभ्रांतं येन जने कार्यपरिहीनं ॥ ८ ॥ सुस्था दुःस्था द्विपदा अधमा तथा उत्तमा अपि सौख्येन । जनन्येव येन धृता नित्यं निजमण्डले सर्वे ॥ ९ ॥ उपरोधरागमत्सरलोभैरपि न्यायवर्जितं येन । न कृतो द्वयोर्विशेषः व्यवहारे कदापि मनागपि ॥ १० ॥ द्विजवरदत्तानुज्ञं येन जनं। रंत्त्वा सकलमपि । निर्मत्सरेण जनितं दुष्टानामपि दण्डनिष्टपनम् ॥ ११ ॥ धनऋद्धसमृद्धानामपि पौराणां निजकरस्याभ्यर्थितम् । लक्षं शतं च सदृशत्वेन तथा येन दृष्टानि ॥ १२ ॥ नवयौवनरूपप्रसाधितेन शृंगारगुणगकक्केण जनवचनीयमलज्जं येन जनेनेह संचारितम् ॥ १३ ॥ बालानां गुरुस्तरुणानां तथा सखा गतवयसां तनय इव । प्रियसुचरितैर्नित्यं येन जनः पालितः सर्वः ॥ १४ ॥ येन नमता सदा सन्मानं गुणस्तुतिं कुर्वता । जल्पता च ललितं दत्त प्रणयिभ्यो धननिवहः ॥ १५ ॥ मरुमाडवल्लस्त्रमणीपरिअंकाअज्जगुर्जरेषु । जनितो येन जनानां सच्चरितगुणैरनुरागः ॥ १६ ॥ गृहीत्वा गोधनानि गिरौ जालाकुलाः पल्ल्यः । जनिता येन विषमे वटनान (ण) कमण्डले प्रकटम् ॥ १७ ॥ नीलोत्पलदलगन्धा रम्यमाकन्दमधुपवृन्दैः । वेरक्षुपर्णछन्ना एषाभूमिः कृतायेन ॥ १८ ॥ वर्षशतेषु च नवसु अष्टादशसमर्ग (ग्र) लेषुचैत्रे नक्षत्रे विधुभस्थे बुधवारे धवलद्वितीयायाम् । श्रीकक्कुकेन हट्टं महाजनं विप्रप्रकृतिबणिजबहुलम् । रोहिन्सकूपग्रामे निवेशितं कीर्तिवृद्ध्यै ॥ २० ॥ मण्डोवरे एको द्वितीयो रोहिन्सकूपग्रामे । येन यशस इव पुञ्जावेतौ स्तंभौ समुत्तब्धौ ॥ २१ ॥ तेन श्रीककुकेन जिनस्य देवस्य दुरितनिर्दलनम् । कारितमचलमिदं भवनं भक्त्या शुभजनकम् ॥ २२ ॥ अर्पितमेतद्भवनं सिद्धस्य धनेश्वरस्यगच्छे। सहशांत जम्बु आम्रक वनि भाटक प्रमुख गोष्ठ्या (ष्ठ्यै) ॥ २३ ॥ श्लाघ्य जन्म कुले कलंकरहितं रूपं नवं यौवनं। सौभाग्यं गुणभावनं शुचिमनः क्षान्तिर्यशो नम्रता

**The Dadhamatamata Temple Inscription of Samvat 589, was found in Manglodha a village of Marwar.**

BY

*MUNSHI DEBI PRASAD MUNSIFF JODHPORE*

---

# दधिमत माता के मंदिर का लेख संवत् ५८९ का

जो

गांव गोठ मांगलोद परगने नागोर इलाके मारवाड में मिला

---

१ ऊँ नमः सरस्वत्यै श्रीदेव्यादधिमती....( पादानुध्याता ) श्रीबूह्मणपा [ दा ]...

२ लिताबूाह्मणा अविघ्ननागः प्रमुखादेवीदधिमतीं विज्ञापयन्ति ॥ अ

३ स्मिंदेव्यानिवेशेगोष्टिकप्रथमंआ [ वा ]..........ण अविघ्ननागः बूाह्मणलंबु

४ कपुत्रः वच्छसः गोत्रः तथाबूाह्मणमिश्र..........................ह्र...............................

पूफकपुत्रैःतथा

५ बूाह्मणयशपतिःयक्षदिन्नपुत्रःएतै ( गोष्टि ) कै [ प्रत ] द्रम्मसहस्रंशताधिकंबूा

६ ह्मण म ( ज्ञ ) हीहगणभटपुत्रेणदत्तंद्रम्मशतं... .. .. ..

.. .. .. .. .. .. .. ..

७ बूाह्मणैर्दत्तंद्रम्मशतंविंशोतरं । तथाबूाह्मणविष्णुदेवः फूलण पुत्रेणद ( त्तं )

८ द्रम्मपंचाशःतथाबूाह्मणनिम्बगणगूरकपुत्रेणदत्तंद्रम्मशतं ॥ तथा बूाह्म

९ णधनियक । अचिन्तितपुत्रेणदत्तद्रम्मात्रिंशति । तथा महत्तरवालादित्य---

१० ---हकपुत्रेणदत्तःद्रम्मशतःतथावप्पकःपूर्णमुखपुत्रेणदत्तंद्रम्म

११ शतं । सार्द्ध·सर्वमंगलमांगल्येशिवेसर्वार्थसाधके । शरण्येत्र्यंम्बकेगौरिनारा

१२ यणिनमोस्तुते ॥ तथाबूाह्मसोमानक बूाह्मणअरवलकदेसुवकः

१३ दित्यपुत्रैर्दत्ताद्रम्मा·( ७० ) संवच्छशतेपु ५०० ८० ९ श्रावण वद १० ३

( संवत्सर ५८९ सावण वद १३ )

**The deed of gift of Solankhi Mularaja, the great Raja of Gujrat dated Samvat 1,051 magh Sudi 15.**

---

# गुजरात के राजाधिराज मूलराज सोलंखी का दानपत्र जो तांबे पर खुदा है

१ ओं संवत १०५१ माघ सुदि १५ अद्येह श्रीमदणहिलपाट

२ के राजावली पूर्ववत् परमभट्टारमहाराजाधिराज

३ परमेश्वर श्रीमूलराजदेवः स्वभुज्यमानसत्यपुरमंड

४ लांतःपाति वरणकग्रामे समस्तराजपुरुषान् ब्राह्मणोत्तरां

५ स्तन्निवासिजनपदांश्चबोधयत्यस्तुवःसंविदितं यथा अ

६ द्यसोमग्रहणपर्व्वणि चराचरगुरुं भगवंतसंविकापति

७ सभ्यर्च्यमातापित्रोरात्मनश्च पुण्ययशोभिवृद्धयेउपरि

८ लिखितवरणकग्रामोयंस्वसीमापर्यंतःसवृक्षमाला

९ कुलःसकाष्ठतृणोदकोपेतःसदण्डदशापराधः श्री

१० कन्यकुब्जविनिर्गताशेषविद्यापारगतपोनिधि

११ श्री दुर्लभाचार्यसुताय श्रीदीर्घाचार्यायशास

१२ नेनोदकपूर्वमस्माभिः प्रदत्तइतिमत्वा अस्मद्वंशजैर

१३ परैरपिभाविभोक्तृभिरस्मत्प्रदत्तधर्मदायोयमनुमं

१४ तव्यः पालनीयश्च । अस्यचग्रामस्य पूर्वस्यांदिशिधणा

१५ रग्रामो दक्षिणस्यांगुंदाउकग्रामः पश्चिमायांवोढग्राम

१६ उत्तरस्यां मेत्रवालग्राम इतिचतुराघाटोपलक्षितो

७ यंग्रामवलीकूपाविभागोदकेनसहदत्तः ॥ उक्तंच भगव

८ ताव्यासेन ॥ षष्टिवर्षसहस्राणिस्वर्गेतिष्ठति भूमिदः । आच्छे

१९ त्ताचानुमंताच तान्येवनरके वसेत् ॥ लिखितमिदं शासनं

२० कायस्थकांचनेन ॥ दूतोत्र महत्तमश्रीशिवराजः ॥---०

२१ श्री मूलराजस्य ॥

# The Rashtrakuta Dhavalarajas Inscription dated Samvat 1053, with Mammattarajas Inscription of Samvat 996 was found in Bijapura a village of Marwar.

*BY*

MUNSHI DEBI PRASAD MUNSIFF JODHPORE.

---

## राष्ट्रकूट धवलराजाका लेख सम्वत् १०५३ का जिसमें मम्मटराजाका लेख सम्वत् ९९६ का भी शामिल है और जो गांव बीजापुर परगने बाली इलाके मारवाड में मिला

---

वि··········त्या··········नवस्तवः। परिस्मृत्यतुना···परा···पिनोजिना : १ तेवः पांतुजिन।विनामसमये [ यत्पादपद्मोन्मुख ] प्रेंखासंख्यमयूखशेखरनखश्रेणीपुविम्बो दयात्। प्रायैकादशभिर्गुणंदशशतीशक्रस्प शुंभदृशां कस्यस्याद्गुणकारकोनयदिवा स्वच्छात्मनांसंगमः २ ··········विप्र·······सत्कारो लोकयोर्हितः । सुशेख······· मूर्द्धिरूढोमहीभृताम् ३ अभिबिभ्रद्रुचिकान्तांसावित्रींचतुराननः । हरिवर्म्मावभू वात्रभूविभुर्भुवनाधिकः ४ सकललोकविलोकनपंकजस्फुरदनंबुदबालदिवाकरः रिपुवधूवदनेन्दुहृतद्युतिः समुदपादि विदग्धनृप [ स्तदा ] ५ स्वाचार्यैर्यो रुचिर वचनैर्वासुदेवाभिधानै र्बोधंनीतोदिनकरकरैर्नीरजन्माकरोवा । पूर्वजैनं निजमिव यशो [ कारय ] द्धस्तिकुंड्ण्यां रम्यं हर्म्यं गुरुहिमगिरेः शृंगशृंगारहारि ६ दानेनतुलितवलिना तुलादिदानस्ययेनदेवाय । भागद्वयंव्यतीर्यतभागश्चा······ ······वर्याय ७ तस्मादभू··········मंमटाख्यो महीपतिः । समुद्रविजयीश्लाघ्य तरवारिः सपूर्वकः ८ तस्मादसमः समजनिसमस्तजनजनितलोचनानन्दः । धवलोवसुधाव्यापीचन्द्रादिवचन्द्रिकानिकरः ९ भंक्त्वाघाटं घटाभिः प्रकटमिव मदं मेदपाटे भटानां जन्ये राजन्यजन्ये जनयतिजनताजंरणंमुञ्जराजे । श्री···माले वलिष्ठे हरिण इव भिया स्वर्गवरसंविनष्टे । तत्सैन्यानां शरण्योहरि रिव शरणेयः सुराणांवभूव १० श्रीमद्दुर्लभराजभूभुजिभुजैर्भुञ्जत्यभंगांभुवं द-

ण्डैर्मण्डनशौण्डचण्डसुभटैस्तस्याभिभूतांविभुः । योदैत्यैरिवतारकप्रभृतिभिः श्रीमालरुद्रंपुरा सेनानीरिवनीतिपौरुषपरोनैपीत्परांनिर्वृतिम् ११ यंमूलादुदमूल य [ द्रु ] रुवलः श्रीमूलराजो नृपो दर्पान्धोधरणीवराहनृपतिं यद्वद्द्विपः पादपम्। आयातं भुवि कान्दिशीकमभिको यस्तं शरण्यो दधौ दंष्ट्रायामिव रूढमूढमहिमा कोलो महीमण्डलम् १२ इत्थं पृथ्वीभर्तृभिर्नाथमानैः [ सामन्ताद्यैः ] सुस्थितैरास्थितोयः । पाथोनाथोवाविपक्षात्स्वपक्षरक्षाकांक्षैरक्षणेवद्धकक्षः १३ दिवाकरस्येव करैः कठोरैः करालिताभूपकदम्बकस्य । आशिश्रियं तापहृतोरुतापं यमुन्नतंपादपवज्जनौघाः १४ धनुर्धरशिरोमणेरमलधर्ममभ्यस्यतो जगामजलधेर्गुणैर्गुरुरमुष्पपारंपरम् । समीयुरपिसंमुखाः सुमुखमार्गणानांगणाः सतांचरितमद्भुतं सकलमेवलोकोत्तरम् १५ यात्रासुयस्य वियदौर्णवि पुष्ठिवशेषात् । वल्गत्तुरंग खुरखातमहीरजांसि । तेजोभिरूर्जितमनेनविनिर्जितत्वात् भास्वान् विलज्जित इवातितरांतिरोभूत् १६ न कामना मनोधीमान्"""" ......... लतांदधौ । अनन्योद्धार्यसत्कार्यभारधुर्योर्थितोपियः १७ यस्तेजोभिरहस्करः करुणयाशौद्धोदनिः श्रद्धया भीष्मोवञ्चनपञ्चितेन वचसा धर्मेण धर्मात्मजः प्राणेन प्रजयानिलोवलभिदोमन्त्रेणमन्त्रीपरो रूपेण प्रमदाप्रियेण मदनो दानेन कर्णोभवत् १८ सुनयतनयंराज्येबालप्रसादमतिष्ठिपत् परिणतवया निःसंगोयाबभूवसुधीः स्वयम् कृतयुगकृतंकृत्वाकृत्यंकृतात्मचमत्कृती रकृतसुकृतीनोकालुष्यंकरोतिकलिः सताम् १९ कालेकलावपि किलामलमेतदीयं लोकाविलोक्य कलनातिगतंगुणौघम् । पार्थादिपार्थिवगुणान्गणयन्तुसत्वानेकंव्यधाद्गुणनिधिं यमितीववेधाः २० गोचरयन्तिनवाचोयच्चारितंचन्द्रचन्द्रिकारुचिरम् । वाचस्पतेर्वचस्त्रिकोवान्यो वर्णयेत्पूर्णम् २१ राजधानीभुवोभर्तुस्तस्यास्तेहस्तिकुण्डिका । अलकाधनदस्येव धनाढ्यजनसेविता २२ नीहारहारहरहासहिमांशुहारि""""""""वारि हविराजविनिर्झराणाम् । वास्तव्यभव्यजनचित्तसमंसमंतात् संतापसंपदपहारपरंपरेषाम् २३ धौतकलधौतकल्पाभिरामरामाःस्तना इवन यस्याम् । सन्त्यपरेप्यपहाराः सदासदाचारजनतायाम् २४

समदमदनालीलालापाः प [ तत्रिवदा ] कुलाः कुवलयदृशांसंदृश्यन्तेदृश-
स्तरलाः परम् । मलिनितमुखायत्रोद्वृत्ताः परंकठिनाः कुचाः निविडरचनानी
वीवन्धाः परंकुटिलाः कचाः २५ गाढोत्तुंगानिसार्द्धं शुचिकुचकलशैः कामिनी
नांमनोज्ञैर्विस्तीर्णानि प्रकामं सहघनजघनैर्देवतामंदिराणि । भ्राजंतेदभ्रशुभ्राण्य
तिशयसुभगंनेत्रपात्रैः पवित्रैः सत्रंचित्राणिधात्री जनहृतहृदयैर्विभ्रमैर्यत्र सत्रम्
२६ मधुराघनपर्वाणोहृद्यरूपारसाधिकाः । यत्रेक्षुवाटालोकेभ्योनालिकरवाद्भिदे-
लिमा २७ अस्यांसूरिः सुराणां गुरुरिवगुरुभिर्गौरवार्होगुणौघैर्भूपालानांत्रिलोकी
वलयविलसितानंतरानंतकीर्तिः । नाम्नाश्रीशांतिभद्रो भवदभिभवितुंभास
मानासमाना कामंकामंसमर्था जनितजनमनःसंभ्रदायस्यमूर्तिः २८ मन्येमुना
मुनीन्द्रेण मनोभूरूपनिर्जितः । स्वप्नेपिनस्वरूपेण समगंस्तातिलज्जितः २९
प्रोद्यत्पद्माकरस्य प्रकटितविकटाशेषभावस्यसूरेः सूर्यस्येवामृतांशुस्फुरितशुभरुचि
वासुदेवाभिधस्य । अध्यासीने पदव्यां यममलविलसज्ज्ञानमालोक्यलोका लो-
कालोकावलोकंसकलमचकलत्केवलंसंभवीति ३० धर्माभ्यासरतस्यास्यसंगतोगु-
णसंग्रहः । अभग्नमार्गणेच्छस्य चित्रं निर्वाणवांच्छता ३१ कमपिसर्वगुणानुमतंज
नं विधिरयं विदधातिनदुर्विधः । इतिकलंकनिराकृतयेकृती यमकृतेवकृता
खिलसद्गुणम् ३२ तदीयवचनान्वितं धनकलत्रपुत्रादिजं विलोक्यसकलंचलं
दलमिवानिलांदोलितम् । गरिष्टगुणगोष्टयदःसमुददीधरद्धीरधी रुदारमतिसुंदरं
प्रथमतीर्थकृन्मंदिरम् ३३ रत्नं वा रम्यरामाणां मणितारावराजितम् । इदंमुख
मिवाभातिभासमानवरालकम् ३४ चतुरस्रपट्टजनघाड्ढनिकंशुभशुककरोटकयुक्
मिदम् । वहुभाजनराजिजिनायतनं प्रविराजतिभोजनधामसमम् ३५ विद
ग्धनृपकारिते जिनगृहेतिजीर्णेपुनः समकृतसमुद्धृताविहभवाम्बुधि .......... नः ।
अतिष्टिपतसोप्यथ प्रथमतीर्थनाथाकृतिं स्वकीर्तिमिवमूर्ततामुपगतांसितांशुद्युति
म् ३६ शान्त्याचार्यैस्त्रिपञ्चाशेसहस्रेशरदामियम् । माघेशुक्लत्रयोदश्यांसुप्रतिष्ठैः
प्रतिष्ठिता ३७ विदग्धनृपतिःपुरायदतुलंतुलादेर्ददौ सुदानमवदानधीरिदमपीप
लन्नाद्भुतम् । यतोधवलभूपतिर्जिनपतेः स्वयंसात्मजो रघट्टमथपिप्पलोपपदकू

पकंप्रादिशत् ३८ यावच्छेषशिरस्थमेकरजतस्थूणास्थिताभ्पुल्लसत्पातालातुल मण्डपामलतुलामालम्बितेभूतलम् । तावत्तार [ रताभिरामरमणीग ] न्थर्व धीर ध्वनिधामिन्यत्राधिनोतुधार्मिकाधियःसद्रूपवेलाविधौ ३९सालंकारासमधिकरसासाधुस न्धानबन्धा श्लाघ्याश्लेषाललितविलसत्ताद्धिताख्यातनामा । सद्वृत्ताढ्यारुचिरावि रतिर्धुर्यमाधुर्यवर्या सूर्याचार्यैर्व्यरचिरमणीवातिनाम्नाप्रशस्तिः ४० सम्वत् १०५३ माघ शुक्ल १३ रविदिने पुष्यनक्षत्रे श्रीऋषभनाथदेवस्य प्रतिष्ठाकृता महाध्वज श्चारोपितः मूलनायकःनाहकजिंदजसशंपपूररुद्रनागपोचिस्वश्रावकगोष्ठिकैरशेषक र्मक्षयार्थं स्वसंतानभवाब्धितर.............न्यायोपार्जितवित्तेनकारितः

परवादिदर्पमथनंहेतुनयसहस्रभंगकाकीर्णम् । भव्यजनदुरितशमनंजिनेन्द्रवरशा सनंजयति १ आसीद्धीधनसम्मतः शुभगुणो भास्वत्प्रतापोज्वलो विस्पष्टप्रति- भः प्रभावकलितोभूपोत्तमांगार्चितः । योपीत्पी [ नपयोधरांतरसु ] खाभिष्वंग संलालितो यः श्रीमान् हरिवर्मउत्तममणिः सद्वंशहारेगुरौ २ तस्माद्बभूव भुविभूरिगुणोपपेतो भूपप्रभूतमुकुटार्चितपादपीठः । श्रीराष्ट्रकूटकुलकाननकल्पवृक्षः श्रीमान्विदग्धनृपतिः प्रकटप्रतापः ३ तस्माद्भूपमणिः [ समस्त.................. परं भाजनं संभूतः सुतनुः सुतोतिमतिमान्श्रीमम्मटो विश्रुतः । येनास्मि न्निजराजवंशगगनेचन्द्रायितं चारुणा तेनेदं पितृशासनंसमधिकं कृत्वापुनः पा- ल्यते ४ श्रीबलभद्राचार्यं विदग्धनृपपूजितंसमभ्यर्च्य । आचन्द्रार्कंयावद्दत्तंभवते मया................. ५ [ श्रीहस्ति ] कुण्डिकायांचैत्यगृहंजनमनोहरंभत्तया । श्रीम द्बलभद्रगुरोर्यीद्विहितंश्रीविदग्धेन ६ तस्मिल्लोकान्समाहूयनानादेशसमागतान् । आचन्द्रार्कस्थितियावच्छासनंदत्तमक्षयम् ७ रूपकएकोदेयोवहतामिहविंशतेः प्रव हणानाम् धर्म..............................क ] क्रयविक्रयेचतथा ८ संभृतगन्त्र्यादेयस्त- था वहन्त्याश्चरूपकः श्रेष्ठः । घाणेघटेचकर्षोदेयः सर्वेणपरिपाट्या ९ श्रीभट्ट लोकदत्तापत्राणां चोल्लिकात्रयोदशिका । पेल्लकपेल्लकमेतद्द्यूतकरैः शासने देयम् १० देयंपलाशपाटकमर्यादावार्तिक..............................। प्रत्यरघट्टंधान्या ढकंतुगोधूमयवपूर्णम् ११ पेड्डाचपञ्चपलिकाधर्मस्यविंशोपकस्तथाभारे । शासनमे-

तत्पूर्वैविदग्धराजेनसंदत्तम् १२ कार्पासकांसकुंकुमसुरमाञ्जिष्टादिसर्वभांडस्य । दशदशपलानिभारेदेयानिविक.........१३ सादानादेतस्माद्भागद्वयमर्हत: कृतं गुरुणा । शेषस्तृतीयभागोविद्याधनमात्मनोविहित: १४ राज्ञातपुत्रपौत्रैश्वगोष्ट्या पुरजनेनच । गुरुदेवधर्नरक्ष्यंनोपेक्ष्यंहितमिप्सुभि: १५ दत्तेदानेफलंदानात्पालि तेपालनात्फलम् । भक्षितोपेक्षितेपापंगुरुदे [ वधना ] धिकम् १६ गोधूममुद्ग यवलवणरालकादेस्तुमेयजातस्य । द्रोणंप्रतिमाणकमेकमत्रसर्व्वेणदातव्यम् १७ प्रभुभिर्वसुधाभुक्तारा [ जभि: ] सगरादिभि: । यस्ययस्य यदाभूमिस्तस्यतस्य तदाफलम् १८ रामगिरिनन्दकलितेविक्रमकालेगतेतुशुचिमासे । [ श्रीम ]द्व लभद्रगुरोर्विदग्धराजेनदत्तमिदम् १९ नवसुशतेषु गतेषुतुषण्णवतीसमधिकेषु माघस्य । कृष्णैकादश्यामिहसमर्पितंमम्मटनृपेण २० यावद्भूधरभूमिभानुभ रतंभागीरथीभारती भास्वद्ब्रानिभुजंगराजभवनंभ्राजद्भवाम्भोधय: । तिष्ट.... सुरासुरेन्द्रमहितंजैनंचसच्छासनं श्रीमत्केशवसूरिसंततिकृतेतावत्प्रभूयादिदम् २१

इदंचाक्षयधर्मशासनं श्रीविग्धराजदत्तं ॥ सम्वत् ९७३ श्रीमंम [ टराजप्र तिष्ठितम् ] सम्वत् ९९६ ॥

सूत्रधारोद्भवशतयोगेश्वरेणउत्कीर्णेयंप्रशास्तिरिति

---

## The Jalor Inscriptions of Chohan Rajas &c.

---

# जोळोर के ळेख जो तो पपाने में हैं

## नंमर १

### वायें हाथ की तरफ साल के छवने पर

---

त्रैलोक्यलक्ष्मीविपुलकुलगृहं धर्मवृक्षालवालं श्रीमन्नाभेयनाथक्रमकमलयुगं मंगलंवस्तनोतु ॥ मन्न्येमंगल्यमाला प्रणतभवभृतां सिद्धिसौधप्रवेशे ॥ यस्यस्कंधप्रदेशे विलसतिग (ध) वलश्यामलाकुंतलाली १ श्रीचाहुमान कुलांवरसृगांक श्री महाराजअणहिलान्वयोद्भव श्री महाराजआल्हणसुत र्यावलीदुर्ललितदलितरिपुवल श्रीमहाराजकीर्त्तिपालदेवहृदयानंदन महाराज श्री समरसिंहदेवकल्याणविजयराज्येतत्पादपद्मोपजीविनानिजप्रौढिमातिरेकतिरस्कृतस कलपील्वाहिकामंडलतस्करव्यतिकरे राज्यचिंतकेजोजलराजपुत्रेइत्येवंकालेप्रव र्त्तमाने रिपुकुलकमलेन्दुः पुण्यलावण्यपात्रं नयविनयविधानं धामसौंदर्यलक्ष्म्याः धरणितरुणनारीलोचनानंदकारी जयतिसमरसिंहक्ष्मापतिः सिंहवृत्तिः २ ॥ तथा ॥ औत्पत्तिकीप्रमुखवुद्धिचतुष्टयेननिर्णीतभूपभवनोचितकार्यवृत्तिः यन्मातुलःसम भवत्किलजोजलाव्हो पाखंडखंडितधुरं नाविपक्षलक्षः ३ श्रीचंडगच्छमुख मंडनसुविहितयतिकुलसुगुत श्री श्री चंद्रसूरिचरणनलिनयुगलदुर्ललितरा- जहंस श्रीपूर्णभद्रसूरिचरणकमलपरिचरणचतुरमधुकरेण समस्तगोष्ठिकसमुदाय समन्वितेन श्री श्रीमालवंशविभूषणश्रेष्ठियशोदेवसुतेनसदाज्ञाकारिनिज नृयशोराजजगधरविधीयमाननिखिलमनोरथेनप्रस्वाविरायगुर्वीरपरमश्रावकेन स- म्वत् १२३९ वैशाखसुद ५ गुरौसकलत्रिलोकीतलाभोमभ्रमणपरिश्रांतकमलावि लासिनीविश्रामविलासमंदिरं अयंमंडपोनृपार्पितः ॥ तथाहि ॥ नानादेशसमा गतैर्नवनवैः स्त्रीपुंसवर्गैर्मुहुर्यस्याहोरचनावलोनपरैर्नोतृप्तिरासाद्यते ॥ स्मारं स्मार

मथोयदीयरचनावैचित्र्यविस्फूर्जितंतैःस्वस्थानगतैरपि प्रतिदिनंसोत्कंटमावर्ण्यते ४ विश्वंभरावरवधूतिलकंकिमेतल्लीलारविंदमथकिंदुहितुः पयोधेः ॥ दत्तंसुरैरमृतकुंड मिदंकिमत्रयस्यावलोकनविधौ.विविधाविकल्पाः ५ गर्त्तापूरेणपातालंपातालेनमही तलं ॥ तुंगत्वेननभोयेनव्यानशे भुवनत्रयं ६ ॥ किंच ॥ स्फूर्जद्व्योमसरः समीनम करंकन्यालिकुंभाकुलंमेपाढ्यंसकुलीरसिंहमिथुनंप्रोद्यद्वृषालंकृतं ताराकैरवमिंदु धामसलिलंसद्राजहंसास्पदंयावच्चावदिहादिनाथभवनेनंद्यादसौमण्डपः ७ कृतिरि यं श्रीपूर्णभद्रसूरीणांभद्रमस्तुश्रीसंघ्याय: सम्पूर्ण ॥

## नंवर २

### वीचके मकानपर सभा मण्डप के छवने में

सम्वत् १२२१ श्रीजावालिपुरीय कांचनगिरिगढस्योपरि प्रभु श्री हेमसूरि प्रबोधित गूर्जरधराधीश्वरपरमार्हतचौलुक्य महाराजाधिराजश्रीकुमारपालदेवकारि तेश्रीपार्श्वनाथ [ तत्कमूक्त ] विंवसहिते श्रीकवरविहाराभिधाने जैनचैत्येसाद्वि धिप्रवर्तनायवृहद्गच्छीयवादींद्रश्रीदेवाचार्याणां पक्षे आचन्द्रार्कं समर्पिते ॥ सम्वत् १२४२ वर्षे एतद्देशाधिप चाहुमानकुलतिलक महाराजश्रीसमरसिंहदेवा देशेन भां० पासूपुत्र भां यशोवीरेण समुद्धृते । श्रीमद्राजकुलादेशेन श्रीदेवा चार्यशिष्यैः श्रीपूर्णदेवाचार्यैः । सम्वत् १२५२ वर्षे ज्येष्ठ सु० ११ श्रीपार्श्व नाथदेवे तोरणादीनांप्रतिष्ठाकार्येकृतेमूलशिपरेचकनकमयध्वजदण्डस्यध्वजारोप णप्रातिष्ठायांकृतायां ॥ संवत् १२६८ वर्षेदीपोत्सवदिने अभिनवनिष्पन्नप्रेक्षामध्य मण्डपेश्रीपूर्णदेवसूरिशिष्यैः चंद्राचार्यैःसुवर्णमयकलसारोपणप्रतिष्ठाकृता शुभंभवतु

## नंवर ३

### वायें हाथ के १ थंभेपर

( १ ) संवत् १३२० वर्षे माघसुद १ सोमे श्रीनाणकीयगच्छ प्रतिवद्धजिना- लयेमहाराजश्रीचंदनविहारे श्रीक्षीवरायेश्वरस्थानपतिनाभट्टारकरावललक्ष्मीधरेण देवश्रीमहावीरस्यआसोजमासे अष्टान्हिकापदेद्रमाणां १०० शतमेकंप्रदत्तं ॥

तद्धाजगच्छान् मडपिकागोष्ठिकस्यहस्त १० द्रम्मकेननैवेद्यं पूजाविधानेदेव श्रीमहावीरस्य ॥

## नंबर ४

एक दूसरे शिलापट

ॐ संवत् १२२२ वर्षे मार्गसुदि ५ गुरौ महाराजश्रीआल्हणदेवकल्याणविजय राज्येतत्पुत्रकेल्हणदेवमहाराजश्रीजयतसिंहे श्रीनागकीयगच्छप्रतिबद्धमहाराजश्री चंद्रनविहारे श्रीजाबालिपुरश्रीमहावीरचैत्यगोष्ठिकगोत्रश्रीकुमारपालेन कारितजिनयुगलपूजानिमित्तं मंडपिकागोष्ठिकहस्ते श्रीमहावीरदेवभांडागारे द्रम्मा पांचशताधिप्रदत्तं तद्व्याजोद्भवेन द्रम्मार्द्धेन नित्यं नैवेद्यं प्रतिकरणीयं ॥ शुभंभवतु

## The Soondha Mount's Inscriptions in Marwar.

# सूंधा पहाडकी चामुंडा माता के मंदिर के लेख

### नंबर १

ओं श्वेतांभोजातपत्रं किमुगिरिदुहितुः स्वस्ताटेन्यागवाक्षः किंवासौख्यास नंवामहिमसुखमहासिद्धिदेवीगणस्य । त्रैलोक्यानन्दहेतोः किमुदितमनर्घश्लाघ्य नक्षत्रमुर्वैः शम्भोर्भालस्यजेन्दुः सुकृतिकृतनुतिः पातुवोराज्यलक्ष्मीम् १ ईशस्यांका वनिरनुपमानन्दसंदोहमूला यञ्चद्दासोञ्चलदलमयीभूषणप्रौढपुष्पा । सल्लावण्या वयवफलिनी पार्वतीप्रेमवल्ली लक्ष्मींपुष्णात्वनुदिनामितिव्यक्तभक्त्यानतानाम् २ विकटमुकुटमायेत्तेजसाव्योम्निदैत्यानिवभुविमणिमय्यामेखलायाः क्वणेन । अन णुरणितलीलाहंसकैस्त्रासयंती फणिपतिभुवनांतश्चण्डिकावः श्रियेस्तु ३ श्रीम द्वत्समहर्षिहर्षनयनोद्भूतांबुपूरप्रभा पूर्वोर्वीधरमौलिमुख्यशिखरालंकारतिग्मद्युतिः पृथ्वींत्रातुमापस्तदैत्यतिमिरः श्रीचाहुमानः पुरा वीरः क्षीरसमुद्रसोदरयशोरा-शिप्रकाशोभवत् ४ रत्नावल्यामिवनृपततौतत्क्रमेविश्रुतायां धर्मस्थानप्रकरकर णप्राप्तपुण्योत्सवायाम् । श्रीनड्डूलाधिपतिरभवल्लक्ष्मणोनामराजा लक्ष्मीलीला सदनसदृशाकारशाकम्भरीन्द्रः ५ आपातालात्समरजलधिमंदरोयस्यखड्गो मुष्टिव्या जाद्भुजगपतिनाशृंखलेनावबद्धः । निर्मथ्योच्चैः सपदिकमलांलीलयोद्धृत्यमत्त श्र क्रेनृत्तंरणितकटकः केलिकंपच्छलेन ६ तस्माद्धिमाद्रिभवनाथयशोपहारी श्रीशो भितोजनिनृपोस्यतनूद्भवोथ । गांभीर्यधैर्यसदनंबालिराजदेवो योमुञ्जराजबलभंग मचीकरत्तम् ७ साम्राज्याशाकारेणुंरिपुनृपतिगजस्तोममाक्रम्यजह्रे । यत्खड्गोगंध हस्ती समररसभरे विंध्यशैलायमाने । मुक्ताशुक्तींदुकांतोज्वलरुचिपुलसत्कीर्तिरे वातटेषु प्रौढानंदोपचारोल्वणपुलकततिः पुष्कराणांछलेन ८ तातेपितृव्यजतयाथ

बांधवः श्रीमहिंदुरजानिष्टभूपतिः । यत्कृपाणलतिकामुपेयुषां छायया विरहितं मुखंद्विषाम् ९ जज्ञेकांतस्तदनु च भुवस्तत्तनूजोऽश्वपालः कालाकारोद्विषिसुचरिते पूर्णचंद्रायमाणः । यःसंलग्नो नखलु तमसा नैवदोषाकरात्मा तेजोमुक्तः क्वचिदपिनयः किंचमित्रोदयेषु १० केयूराग्रनिविष्टरत्ननिकरःप्रोद्यत्प्रभाडम्बर. व्यक्तं संगररंगमण्डपतलेयंवैरिलक्ष्मीःश्रिता । वीरेषुप्रश्रितेषुतेषुरजसा नीतेषुदुर्लक्ष्यतां लब्धोपायबलापि निर्मलगुणैर्वश्याप्रशस्याकृतेः ११ पुत्रस्तस्याहिलइतिनृपस्तन्मयूखच्छलेन स्रष्टायस्यव्यधितयशसांतेजसांतोलनंनु । गंगातोलेशशितपनयोर्दम्भतश्चारुचेले मध्यस्थायिध्रुवमिवलसत्कण्टकेकौतुकेन १२ गूर्जराधिपतिभीमभूभुजः सैन्यपूरमजयद्रणेषुयः । शंभुवत्त्रिपुरसंभवंबलंबाडवोनलइवाम्बुधेर्जलम् १३ सैन्याक्रांताखिलवसुमतीमण्डलस्तत्पितृव्यः श्रीमान्राजाभवदथ जितारातिमल्लोणहिल्लः । भीमक्षोणीपतिगजघटायेन भग्नारणाग्रे । हृद्यार्थाम्भोनिधिरघुकृतेवेहपंक्तिः खलानाम् १४ अम्भोजानिमुखान्यहो मृगदृशांचंद्रोदयानांमुदो लक्ष्मीर्यत्रनरोत्तमानुसरणव्यापारपारंगमा । यानानिप्रसभं शुभानि शिखरिश्रेणीव गुप्यद्गुरुः स्तोमोयस्यनरेश्वरस्यतुलनां सेनांबुराशेर्दधौ १५ उर्वीरुट्विटपावलम्बिसुगृहीहर्म्येषुदस्वाटशं ध्यतात्यंतमनोहराकृतिनिजप्रासादब.तायनः । भूस्फोटानिवनांतरेषुविततान्यालोक्यहाहेतिवाक् सस्मारातपवारणानिशतशोयद्वैरिराजव्रजः १६ दृष्टःकैर्नचतुर्भुजःससमरे शाकम्भरींयोबलात् जग्राहानुजघान मालवपतेर्भोजस्यसाढाह्वयम् । दण्डाधीशमपारसैन्यविभवंतीव्रंतुरुष्कंचयः साक्षाद्विष्णुरसावितीह यशसाशृंगारितायेनभूः १७ जज्ञेभूभृत्तदनुतनयस्तस्यबालप्रसादो भीमक्ष्माभृच्चरणयुगलीमर्दनव्याजतोयः । कुर्वन्पीडामतिवलतयामोचयामासकारागाराद्भूमीपतिमपि तथाकृष्णदेवाभिधानम् १८ श्रीकिर्योजलदभ्रमंदधुरहो सैन्येस्यसेवारसायातर्तुप्रतिमेसमुज्वलपटावासामरालश्रियम् । कंपंवायुवशेनकेतुनिवहाः शस्यानुकारंचते संगीतानिचकोकिलारवतुलां चित्तेतुतापंद्विषः १९ श्रीमांस्तस्याजनिनरपतिर्बांधवोजिंदुराजो यःसंडेरेकेइवातिमिरंवैरिवृंदंविभेद । यस्य ज्योतिः प्रकरमभितोविद्विषः कौशिकाभा द्रष्टुंशक्तानहिगिरिगुहामध्यमध्या


श्रितास्तत् २० गच्छंतीनांरिपुमृगदृशांभूषणानांप्रपाते वाष्पासारैर्घनततितुलांबिभ्रतीनामरण्ये । दूर्वाभ्रांतिंमरकतमणिश्रेणयोयत्प्रमाणे ताम्बूलीयभ्रममिव चिरं चक्रिरे पद्मरागाः २१ पृथ्वीं पालयितुंपवित्रमतिमान्य.र्कपुकाणांकरं मुंचन्प्रापयशांशिकुंदधवलान्यानंदकृद्यानन:। पृथ्वीपालइतिधुरंधरंक्षितिपतिस्तस्यांगजन्माभवत् प्रत्यक्षोरुनिधिः सगूर्जरपतेः कर्णस्यसैन्यापहः, २२ यत्सेनाकिलकामधेनुसदृशाकीर्तिस्त्रवंतीयय: स्वच्छंदंसचराचरेपिभुवनेशत्रूंस्तृणीकुर्वती । धर्मवत्समिव स्वकीयमनघंवृद्धिंनयंतीमुदा कस्यानंदकरीवभूवनभुवोभीष्टंसमातन्वती २३ श्रीयोजकोभूपतिरस्यबंधुर्विवेकसौधंप्रबलप्रतापः । श्वेतातपत्रेणविराजमानः शक्त्याणहिल्लाख्यपुरेपिरेमे २४ त्यक्त्वासौधमुदारकेलिविपिनंक्रीडाचलेदीर्घिकां पल्यंकाश्रयणंकरेणुपमुदा स्थानंसमन्तादपि । यस्यारिक्षितिपालबाललना: शैलेवनेनिर्झरे स्थूलग्रावशिरस्सुसंस्मृतमगु: पुर्वोपभुक्तश्रियाम् २५ श्रीआशाराजनामासमजनिवसुधानायकस्तस्यबन्धु:साहाय्यंमालवानांभुवियदसिकृतंवीक्ष्यसिद्धाधिराजःतुष्टोदत्तेस्मकुम्भंकनकमयमहोयस्यगुण्यहुरुस्यं तंहर्तुंनैवशक्त.कलुषितहृदयः शेषभूपालवाग्भि: २६ उदयगिरिशिर:स्थं किं सहस्रांशुबिंबं विततविशदकीर्तेः मूर्द्धिकिंनुप्रतापः । उपरिसुभगतायाउद्गतामञ्जरीकिं कनककलशआभायस्यगुण्यहुरुस्य: २७ कनकरुचिशरीरः शैलसाराभिरामः फणिपतिमहनीयस्यावतार:सविष्णोः। सलिलनिधिसुताया मंदिरेस्कन्धदेशे दधदवनिमुदाराग्रिमः पुण्यमूर्तिः २८ सत्रागारतडागकाननहरप्रासादवापीप्रपाकूपादीनि विनिर्ममे द्विजजनानन्दीक्षमा-मण्डले। धर्मस्थानशतानियः किलबुधश्रेणीपुकल्पद्रुमः कस्तस्येन्दुतुषारशैलधवलंस्तोतुंयशः कोविदः २९ श्वेतान्येवयशांसि तुंगतुरगस्तोमः शितः सुभ्रुवां च-ञ्चन्मौक्तिकभूषणानि धवलान्युच्चैः समग्राण्यपि । प्रेमालापभवस्मितं च विशदं शुभ्राणिवस्त्रौकसां वृन्दानीतिनृपस्ययस्य पृतना कैलासलक्ष्मीश्रिता ३० प्र-शस्तिरियं बृहद्गच्छीयजयमंगलाचार्यकृतिःभिषग्विजयपालपुत्रनाम्नासिंहेनलिखिता सूत्र जिसपालपुत्र जिसरविणाउत्कीर्णा ॥

# नंबर २

जटामूलेगंगा प्रबलहरीपूरकुहना समुन्मीलच्छत्रप्रकरइवनम्रेषुनृपताम् । प्र-
दातुंश्रीशम्भुः सकलभुवनाधीश्वरतयातयावोदेयाद्वः शुभमिहसुगन्धाद्रिमुकुटः ३१
आशाराजक्षितिपतनयः श्रीमदाल्हादनाह्वो जज्ञेभूभृद्भुवनाविदितश्चाहमानस्य
वंशे । श्रीनड्डूलेशिवभवनकृद्धर्मसर्वस्ववेत्ता यस्साहाय्यंप्रतिपदमहोगूर्जरेशश्चकांक्षे
३२ चञ्चत्केतकचम्पकप्रविलसत्तालीतमालागुरु स्फूर्जच्चन्दननालिकेरकदलीद्राक्षाम्र
कम्रेगिरौ । सौराष्ट्रेकुटिलोग्रकण्टकभिदात्युद्दामकीर्तिस्तदा यस्याभूदभिमानभा
सुरतया सेनाचराणांरवः ३३ श्रीमांस्तस्यांगजइहनृपःकेल्हणोदक्षिणाशाधीशो
दश्चाद्दिलिमनृपतेर्मान्यहृत्सैन्यासिंधुः । निर्भिद्योच्चैःप्रबलकलितंयस्तुरुष्कंव्यधत्त
श्रीसोमेशास्पदमुकुटवत्तोरणंकांचनस्य ३५ भ्रातास्यप्रबलप्रतापनिलयः श्रीकीर्ति
पालोभवत् भूनाथःप्रतिपक्षपार्थिवचमूदावाम्बुवाहोपमः । यत्खड्गाम्बुनिधौहता
रिकरिणां कुम्भस्थलीभ्यःक्षरन्मुक्तानांनिकरोमरालकलितंधत्तेस्मधाराश्रयः
३५ योदुर्दांतकिरातकूटनृपतिं भित्वाशरैरासलं तास्मिन्कासहृदेतुरुष्कनिकरं
जित्वारणप्रांगणे । श्रीजावालिपुरेस्थितिंव्यरचयन्नड्डूलराज्येश्वरश्रितारत्नानि
भः समग्रविदुषांनिःसीमसैन्याधिपः ३६ श्रीसमरसिंहदेव स्तत्तनयः क्षो
णिमण्डलाधिपतिः इंद्र इव विबुधहृदयानंदी पुरुषोत्तमोहारिवत् ३७
प्राकारः कनकाचले विरचितो यनेहपुण्यात्मना नानायंत्रमनोज्ञकोष्टकनतिर्विद्या
धरीशीर्षवान् । किं शेषः फणवृंदमेदुरतनुर्वक्षःस्थलेवाभुवो हारः किंभ्रमण
श्रमादुडुगणः किंवैषभेजोस्थितिम् ३८ कमलवनमिवेदं वप्रशीर्षालिदम्भात्
निखिलविपुलदेशः श्रीसमाकर्षणाय । लिखितविशदविंदुश्रेणिवन्मत्तवैरि
क्षितिपतिविफलाजिस्तोमसंख्यानिमित्तम् ३९ तोलयामासयः स्वर्णैरात्मानंसोम
पर्वणि । आरामरम्यंसमरपुरंयः कृतवानथ ४० श्री कीर्तिपालभूपतिपुत्री
जाबालिपुरवरेचक्रे । श्रीरूदलदेवीशिवमंदिरयुगलंपवित्रमतिः ४१ श्रीसम
रसिंहदेवस्य नंदनः प्रवलशौर्यरमणीयः ॥ श्रीउदयसिंहभूपतिरभूत्प्रभाभास्व
दुपमानः ४२ श्रीनड्डूलश्रीजाबालिपुरमाण्डव्यपुरबाग्भटमेरुसुराचद्रंराटहृदखेड

ामसैन्यश्रीमालरत्नपुरसत्यपुरप्रभृतिदेशानामयमधिपतिः ४३ शेषःस्तोतुमिव
रूढरसनाभारःसमन्तादभूत् क्षीराब्धिः परिरब्धुमुद्धुरभुजः कल्लोलमालामिषात्
ुंबानिमिषाक्षिपंकजवनोवास्तोःपतिर्यस्यतां विश्वश्रीहृदयस्यहारलतिकांकीर्तिं
सितांशूज्वलाम् ४४, श्री प्रल्हादनदेवी राज्ञी यस्यांगजं प्रसूतेस्म ॥ श्रीचाचिग
ेवाह्वं तथैव चामुण्डराजाख्यम्, ४५ धीरोदात्तस्तुरुष्काधिपमददलनोगूर्जरेंद्रै
रजेयः सेवायातक्षितीशोचितकरणपटुःसिंधुराजांतकोयः । प्रोद्दामन्यायहेतुभ
रतमुखमहाग्रंथतत्वार्थवेत्ता श्रीमज्जाबालिसंज्ञापुरिशिवसदनद्वन्द्वकर्ताकृतज्ञः ४६
तत्पट्टोदयशैलभानुरनघप्रोद्दामधर्मक्रियानिष्णातःकमनीयरूपनिलयोदानेश्वरः
सुप्रभुः । सौम्यः शूरशिरोमणिश्वसदयः साक्षाद्देवेंद्रःस्वयं श्रीमान्चाचिगदेव
एवजयतिप्रत्यक्षकल्पद्रुमः, ४७ भ्रूभंगेनभयंकरेणविजितप्रत्यर्थिभूमीपतिः श्री
मान्चाचिगदेवएवतनुतेनिर्विघ्नवृत्तिंभुवम् द्विजिह्वंविदधातुपन्नगपतिर्वक्रंवराहोमुखं
कूर्मोनक्रनतिंकरींद्रनिवहः संघातसौख्यंपरम् ४८ मेरोःस्थैर्यवचनरचनंवाक्पतेर्य
स्यतुल्यं पृथ्वीभारोद्धरणमसमंपन्नगेंद्रानुसंगी । साक्षाद्रामःकिमयमथवापूर्णपीयूष
रश्मिश्रितारत्नंप्रणयिनिजनेदेव एवैषतस्मात् ४९ स्फूर्जद्वीरमगूर्जरेशदलनोयः
शत्रुशल्यंद्विषंश्चत्पातुकपातनेकरसिकःसंगस्यरंगापहः उन्माथन्नहराचलस्यकु-
लिश कारास्त्रिलोकीतलं भ्राम्यत्कीर्तिरशेषवैरिदहनोदग्रप्रतापोल्वणः ५० श्रीमाले
द्विजजानुवाटिककरत्यागीतथाविग्रहा स्यस्यापिचरामसैन्यनगरेनित्यार्चनार्थप्रदः
प्रोत्तुंगोप्यपराजितेशभवनेसौवर्णकुम्भध्वजारोपीरूप्यजमेखलावितरणस्तस्यैवदेवस्य
यः चक्रेश्रोअपराजितेशभवनेशालातथास्यांरथःकैलासप्रतिमस्त्रिलोककमलालंकार
रत्नोच्चयः । येनक्षोणिपुरंदरेणकृतिनामानंदसंवित्तये भार्गवानिजमेवपर्वततुलां
नीतंसमंतादपि ५२ कर्णोदानरुचिर्बलिश्वसुकृतीश्लाघ्योदधीचिस्तथा हृद्यःकल्प
तरुः प्रकाममधुराकारश्चचिंतामणिः । श्रीमच्चाचिगदेवदानमुदितास्तन्नामगृह्णंति
यत्तत्कीर्तेरपिनूतनत्वमभवत्भूमीभुजांसद्मसु ५३ स्फूर्जन्निर्झरझांकृतेनसुभगं
तत्केतकीनांवनं मिश्रीभूतमनेककम्रकदलीवृंदेनयत्तेत्रयः । आम्राणांविपिनंचदेव
ललनावक्षोरुहस्पर्द्धये प्रोद्यत्प्रौढफलावलीकवचितंजम्बूवनेनांचितम् ५४ मरो

मेरोस्तुल्यस्त्रिदशललनाकेलिसद्दशं सुगंधाद्रिर्नानातरुनिकरसन्नाहसुभगः । नृपेणेंद्रेणेवप्रसृमरतुरंगोच्चयखुर प्रकंपोर्वीपीठंरतिरसवशात्तेनददृशे ५५ तन्मूर्द्धनित्रिदशेंद्रपूजितपदांभोजद्वयंदेवतां चामुण्डामघटेश्वरीति विदितामभ्यर्चितांपूर्वजैः नत्वाभ्यर्च्यनरेश्वरोथविदधेस्यामंदिरेमण्डपं क्रीडत्किन्नरकिन्नरीकलरवोन्माद्यन्मयूरीकुलम् ५५ ( संवत् १३१९ ) त्रयोदशशतैकोनविंशतौमासिमाधवे चक्रेक्षयतृतीयायां प्रतिष्ठामण्डपोद्विजैः ५७ संपल्लाभंघटयतुशुभंकुम्भचक्रोगणेशः सिद्धिंदेयादभिमततमां चण्डिकाचारुमूर्त्तिः । कल्याणाय प्रभवतुसतांधेनुवर्गः पृथिव्यां राजाराज्यं भजतुविपुलं स्वस्तिदेवद्विजेभ्यः ५८ सश्रीकिरिसत्तकवादिदेवाचार्यस्यशिष्योजनिरामचंद्रः । सूरिर्विनेयोजयमंगलोस्य प्रशस्तिमेतांसुकृतीव्यधत्त ५९ भिषग्वरविजयपालपुत्रेणनाम्नसिंहेनालिखिता । सूत्रधारजिसपालपुत्रेणजिसरविणोत्कीर्णा ६०



# PREFACE

I have been fond of History from the very early part of my life This fact subsequently brought me to the notice of the high officers, and I had the honor of working under Captain W J W Muir, the Political Agent of Haroti and Tonk, in connection with the preparation of a Gazetteer and old inscriptions of Haroti, as will appear from the certificate printed below My connection with this work created in me an interest for the reseaches of antiquities and I spent a few past years in the discovery of old inscriptions A few of them connected with Marwar are given in this Manual

I must ackowledge with thanks the valuable assistance I have received in reading out and translating these inscriptions from the under mentioned persons to whom I am much obliged—

(1)—Bias Ram Karan, second Pundit Jodhpore High School

(2)—Bias Sham Karan, Pundit of the Historical Department Marwar

(3)—Pundit Gorishunkar, Librarian Victoria Hall Oodeypore

(4)—Bhat Guttu Lall the renowned Pundit of Bombay

(5)—Pundit Sheo Narain, the head Pundit, Mayo College, Ajmere,

This Manual only contains my preliminary researches in Marwar, and as I have very little time at my disposal I fear it will not be to the satisfaction of the learned authorities I shall however, try my best to improve this work hereafter

DEBI PARSHAD MUNSIFF,
Member of the Historical Department
Deputy Supdt. of the Marwar State, and Census
*JODHPORE*

*1st May 1894*

---

*Debi Prashad* has worked for me in translating and compiling Hindeo manuscript—a work he has done well He has a good general knowledge of Indian and Local History and I gladly recommend him to any one anxious of securing assistance in such researches.

Camp Deoli (Sd) W J W MUIR,
Offg Political Agent,
*Haroti and Tonk*

*Deoli, 1st February 1873*